# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-5) | **प्रश्नपत्रम्**-७ (New & Old) | **गुणाः** - ७० |
| **विषयः** - धर्मशास्त्रम् | **कोड**- **CE - 3-5-9** | **समयः** - १० तः १ |
| **दिनाङ्कः** - ११/१२/२०१८ | **सन्दर्भग्रन्थः**- याज्ञवल्क्यस्मृतिः (प्रायश्चित्ताध्यायः) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः ससन्दर्भं व्याख्या विधेया ।** **१०**

१. त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।
उनद्विवर्ष उभयोः सूतकं मातुरेव हि ॥

२. महीपतीनां नाशौचं हतानां विद्युता तथा ।
गोब्राह्मणार्थं संग्रामे यस्य चेच्छति भूमिपः ॥

३. लाक्षालवणमांसानि पतनीयानि विक्रये ।
पयो दधि च मद्यं च हीनवर्णकराणि तु ॥

**प्र-२ द्वयोरेकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

१. जनननमरणशौचसंपाते निर्णयः क्रियताम् ।

२. कृष्यादीनां जीवनहेतूनामसंभवे जीवनं कीदृशम्?

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वयोः ससन्दर्भं व्याख्या विधेया ।** **१०**

१. दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः ।
श्रोतं स्मार्तं फलस्नेहैः कर्म कुर्यात्तथा क्रियाः ॥

२. अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा ।
आधयो व्याधयः क्लेशा जरारूपविपर्ययः ।

३. अनन्यविषयं कृत्वा मनोबुद्धिस्मृतीन्द्रियम् ।
ध्येय आत्मा स्थितो योऽसौ हृदये दीपवत्प्रभुः ॥

**प्र-४ एकस्य सारभूतं वर्णनं कुरुत ।** **१०**

१. चान्द्रायणादिविधाने के के नियमाः?

२. जीवपरमात्मनो भेदं निरूप्य जीवात्मा कर्म कथं करोति?

## ॥ तृतीयान्वितिः ॥

**प्र-५ द्वयोः ससन्दर्भ व्याख्या विधेया ।** **१०**

१. प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।

कामतो व्यवहार्यस्तु वचनादिहु जायते ॥

२. संग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात् ।

मृतकल्पः प्रहारार्तो जीवन्नपि विशुद्ध्यति ॥

३. चरितव्रत आयाते निनयेरन्नवं घटम् ।

जुगुप्सेरन्न चाप्येन संवसेयुश्च सर्वशः ॥

**प्र-६ द्वयोरेकस्य सविस्तरं विवेचनं कुरुत ।** **१०**

१. सुरासंसृष्टशुहकरसान्नभक्षणे प्रायश्चितं मिताक्षरानुसारेण वर्ण्यताम् ।

२. विप्रदण्डोद्यतमेकृच्छ्रादिप्रायश्चित्तानां निरूपणं विस्तरेण कुरुत ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. पितृणां दिशा का?

२. जलाञ्जलिः कस्मै देया न भवति?

३. व्रतादेशानन्तरं मरणे सति कति दिवसानां आशौचं भवति?

४. अनूचान शब्दस्य कोऽर्थः ?

५. श्रोत्रियः शब्दस्य कोऽर्थः ?

६. ब्राह्मणाः आपत्तिकाले स्वजीविकां कथं चालयेत्?

७. वानप्रस्थ शब्दस्य व्युत्पत्तिपूर्वकं अर्थं लिखत ।

८. दान्त शब्दस्य कोऽर्थः ?

९. त्रिषवणस्नायी शब्दस्य कोऽर्थः ?

१०. पञ्चविषयाः के सन्ति?

११. सन्यासिनां भिक्षापात्रं किं भवति?

१२. कर्मेन्द्रियाणि कानि सन्ति?

१३. ब्रह्महा कां कां योनिं प्राप्नोति?

१४. प्रायश्चिताध्याये कति श्लोकाः सन्ति?

१५. अनभिख्यातदोषः प्रायश्चित्तं कथं कुर्यात्?

–००–